ISSN 2278 - 0688
Volume - XV

# ऋतायनी

## A REFEREED RESEARCH JOURNAL OF SANSKRIT

Purulia , West Bengal

ISSN 2278 - 0688
Volume- XV
April 2019

# ऋतायनी

## A REFEREED RESEARCH JOURNAL OF SANSKRIT

**Chief Editor**
**Dr. Chandrakanta Panda**

**Editor**
**Dr. Jagamohan Acharya**

**Associate Editors**
Dr. Buddheswar Sarangi
Dr. Jogeswar Mahanta
Sushant Pradhan

Purulia, West Bengal

Volume- XV April-2019 ISSN 2278 - 0688

## CONTENTS


| No. | Title | Author | Page |
|---|---|---|---|
| 1. | भारतवर्षेमिल्लस्य संस्कृतानूदितकाव्यस्य लोकोपयोगित्वम् | ड.भारतभूषणरथ: | 1 |
| 2. | सिद्धान्तकौमुद्यां प्रतिफलिता प्राचीनशिक्षाव्यवस्था | गीताञ्जलित्रिपाठी | 7 |
| 3. | Some Ideal woman in ancient India | Dr. Samapti Garai | 14 |
| 4. | Kingship in ancient India | Sanchita Kundu | 24 |
| 5. | आचार्य रघुनन्दनविरचित शुद्धितत्त्वग्रन्थे प्रतिपादित द्रव्यशुद्धिप्रकार: | बावलुप्रामानिक: | 35 |
| 6. | Purusartha : Its Present day Relevance | Dr. Bibhuti Bhusan Nayak | 47 |
| 7. | Position of Sanskritic learning from past to present in India | Dr. Bidisha Misra | 55 |
| 8. | Forms of marriage in Manusmruti and Court of Law | Dr Anusuya Prusty | 60 |
| 9. | Importance of principal Upanisads | Namita Kumari Naik | 70 |
| 10. | Natural Disaster and its Management in Kautilya's Arthasastra | Soma Bandyopadhyay | 78 |
| 11. | The definitions and characteristics of muktaka as mentioned by the different Sanskrit rhetoricians | Dr. Pratim Bhattacharya | 85 |
| 12. | श्रीमद्भागवतं नाम पुराणं विद्वद्विद्युतम् | श्रीमती सुकन्या सेनापति | 90 |
| 13. | न्यायनये मुक्तिकारणविचार: | डं. मनोरञ्जन-दास: | 94 |
| 14. | शिशुपालवध-महाकाव्ये माघस्य संगीतचेतना | ड. शीला चक्रवता | 97 |
| 15. | वैदिकशब्दानां रहस्यात्मकं निर्वचनम् | ड़.जगमोहन आचार्य: | 101 |
| 16. | Agriculture and Management in Arthasastra | Kabita Ray | 109 |
| 17. | Concept of Environment and Environmental Awareness in Ancient Indian Literature – A Succinct Review | Dr. Partha Pratim Roy | 113 |
| 18. | विधौ संज्ञासूत्राणां प्रवृत्तिप्रकार: | शम्भु माना | 118 |
| 19. | Creation: A Study on Christianity and Hinduism | Mrs. Mrinmoyee Samanta | 124 |
| 20. | Music in Gitagovinda | Dr. Santanu Mandal | 131 |
| 21 | वामनपुराणे मोक्षस्य अवधारणा | तरणीकुमारपण्डा | 135 |
| 22. | अष्टाङ्गयोगदिशा यमस्याधारेण मानवीयमूल्यबोध: | दीपाञ्जलिभञ्ज: | 143 |

# वैदिकशब्दानां रहस्यात्मकं निर्वचनम्

डॉ.जगमोहन आचार्य:

**उपक्रम:**

वेदस्यार्थ: रहस्यात्मक: निगूढ: च । अस्य सूचनाऽपि वेदात् एव लभ्यते । वैदिकर्षीणाम् इयं दृढ़ा धारणा आसीत् यत् मन्त्राणाम् उन्मेष:चेतनाया: निगूढान्तरतमस्तरादेव भवति । वेदे निगूढ़ज्ञानस्य निधि: प्रक्षिप्तोऽस्ति। वैदिकमन्त्राणां दिव्यता, अच्युता च अन्तश्चैतन्यजन्यस्फुरण-स्योन्मेषस्य च पूर्ववर्णिता वार्त्ता वैदिकप्रामाण्येनैव स्वत: सिद्धा भवति । वैदिकमन्त्राणां प्रत्येकं शब्द: कस्यापि आध्यात्मिकतत्त्वस्य प्रतीको भवति । योगेन तपसा च पवित्रतमे हृदि एव स्फुरितो भवति ।

श्रीअरविन्द: आध्यात्मिकपद्धते: समर्थक: । श्रीअरविन्दस्यानुसारं वेदे रहस्यात्मक: अर्थो वर्तते। श्रीअरविन्दस्य विचारे मन्त्रस्य अर्थद्वयं प्रथमत: यागे नियोजयितृणां कृते यज्ञपरक:तथा द्वितीयत: अध्यात्मप्रवणजनानां कृते गूढ़ार्थनिहितोऽर्थ: । गूढ़ार्थ: मनोवैज्ञानिक: तथा आध्यात्मिक: एव। यद्यथा अग्ने: अर्थद्वयम् यज्ञाग्नियागे हूयमान: अग्नि: एवं हृदये प्रदीप्ता इच्छाशक्ति: च । सूर्यस्य सौरमण्डले दीप्तिमत् पिण्डम् एकरूपम्, द्वितीयत: अन्त: प्रकाशक: उच्चज्ञानस्य बौधक: । सोम: सोमरसस्य बोधक: आध्यात्मिकानन्दस्यापि बोधक: । अत: देवताया: एकत: वाह्यरूपम् अन्यत: परमात्मन: दिव्यशक्ते: अंश: । मनोवैज्ञानिकशक्तिरपि प्रतीकात्मकतया वर्तते । श्रीअरविन्ददृष्ट्या वेद: सिद्धदृष्टावाणी या आध्यात्मिक जगत: रहस्यम् उद्घाटयति । वैदिकशब्द: निश्चयेन आध्यात्मिकतत्त्वस्य प्रतीक: ।

**वैदिकशब्दानां रहस्यात्मकं निर्वचनम्**

**अग्निनाग्नि: समिध्यते –(ऋग्वेद:,१.१२.६)**

अग्निना अग्नि: इति वीप्सायाम् आचार्या: भिन्नार्थं प्रकटयन्ति। अग्निहोत्रानुसारं यज्ञाग्ने: प्रज्वलनार्थं काष्ठप्रस्तरादिघर्षणजन्योऽग्नि: ।अर्थात् आहवनीयाख्य: तस्मिन् प्रक्षिप्यमाणेन निर्मथ्येन प्रणीतेन सम्यक् दीप्यते इति सायण:, स्कन्द:, वेङ्कट:, मुद्गल: च एतन्मतस्य पोषका: । स्वामी दयानन्द: वैज्ञानिकतत्त्वार्थं प्रकटयति।

श्रीअरविन्द: परन्तु अत्र आध्यात्मिकार्थस्य दृढतां स्थापयति। भगवत्सङ्कल्पाधिष्ठिता अग्निदेव: समष्टिगत: व्यष्टिगतेन यजमानान्तर्निर्मथिताग्निना दिव्यसङ्कल्पाग्निनैव सम्यक् प्रदीप्यते। भागवतसङ्कल्पाधिपतिर्देवोऽग्निर्हि अतीन्द्रियार्थदर्शी ऋषि: । योऽन्तर्याजकस्तस्मै स्वात्मानं स्वात्मीयञ्च सर्वं समर्पयति, तस्य गृहस्य वासस्थानस्य, देहगेहस्यान्तर्मन्दिरस्य च पती/रक्षक: प्रभुश्च भवत्यसौ नित्ययुवाऽजरामरशक्तिमयोग्नि: । स यजमानस्य हव्यानि वहति देवान् यथायथम् । ज्वालाजिह्वामयं